श्रीमत्करांकदंडनंशशांकमंडनंत्रणेमि आदौप्रेमरुषायिताहरमुखव्यापारलोलाशनेर्व्रीडाभारविघूर्णितामकुलिताधूमाङ्गमव्याजतः पत्यः संमिलिताद्दशासरभ
१ सव्यावर्तनव्याकुलापार्वत्याः परिनीतिमंगलविधौदृष्टिः शिवायास्तवः १ अपिच संपदमतरलत्प्यामनन्यसामान्यबाहुदर्पनिधेः पुण्यातुचित्रयोनेरधिदैवतघट
नापटीयसीविभुता २ नार्यतेसत्रधारः सत्रणाममंजलिंबध्वाब्रह्मस्तंभकुटुंबस्ययोगक्षेमविधायिनो आनंदवियद्दोभूत्यैभव्यास्तामादिदंपती ३ इतिपुष्पांजलिं
विकीर्य नेपथ्याभिमुखमवलोक्य आर्यइतस्तावत् प्रविश्यनटी अज्जउवयहि छा० आर्यमस्मि सूत्र० आर्ये अद्यखलुकिलप्यभिनवंपार्वतीपरिणयनामरू
पकंद्रष्टुमभिलषतिपरिषदेषा नटी अज्जतंउणइयंकिंदिः कम्मकेवंभविः सदि छा० आर्यतत्पुनरभिनवंकस्यकवेः कृतिर्भविष्यति सू० अस्तिकविसार्वभौमोवस्मा
न्मयजलधिकौस्तुभोबाणः नाट्यतियद्रसनायांवेधोमुखरंगलासिकावाणी ४ तद्दिरुचितेनविचित्रसंधानेनसामाजिकानुपरुध्यामहे नटी छा० आर्यान्यथु
नाटकंपुष्पवर्तमानेपुकथंतत्रवतत्रभवतोभिलाषः सूत्र० संविधानस्यसामग्र्यंरसानांपरिपुष्टता सारश्चयंसोकुमार्यंचसभ्यानांरंजनक्षमं ५ ततएवाहंगुण्याद्दित
यातत्रप्रवृत्तः न० छा० यद्येवंयुज्यते सू० नटीनिर्वर्ण्यआर्यपार्वतीपरिणयप्रसंगंपिंकिनिमित्तंभवतीविनायमानंवदिलोक्यते न० छा० अद्यास्मनापरिण
यप्रसंगेनास्माकंमपिवत्सायाबालचंडिकायाअनुरूपवरलाभमहोत्सवः कथंभविष्यतीतिनिरंतरंचिंताकुलंमेहृदयं सू० अलंविषादेन विधिरेवकन्यकानामभिम
तवरयोजनार्थमुद्यक्तेअयमिहमहतीहयितांमुनिरिवगिरिराजकन्यायाः ६ प्रस्तावना ततःप्रविश्याकाशमार्गेणनारदः नारदः हंतजन्मतःप्रभृतिनजहा
तिनजन्मस्थानियतमरकार्यघटनाकुतूहलिता यतः दक्षाल्लब्धसमुद्भवातदनुतत्यक्तापितद्वीक्षणाजातासंप्रतिशैलराजसदनेगौरीतिदाक्षायणी एनांयोजयितुंह
रणहिमवत्सोनोतपस्तप्यताकार्यंभाविसमाकलय्यमहतामद्यप्रवर्तामहे ७ किंचिदंतरमवर्तीर्य अवलोक्यच परिवहनाम्नः पवनस्यपथानंप्रात्रवानस्मि तथाहि
आरादंजलिपेयमत्रविकसन्मंदारपुष्पास्थितंसौरभ्यंपवनोपनीतमभितोधावत्यमीषट्पदाः तंद्रीसंडलमार्द्रयंतिकणिकामंदाकिनीपाथसामप्यंतःकरणंचसस्म
हृतीमालंबतुनिर्वृतिं ८ सुरभ्यावतरणंनाटयित्वा अधोवलोक्य अयमध्यमलोकस्यनंदीयांसंप्रदेशमनुप्राप्तोस्मि यतः उद्यद्भिःशिखरैरमीकतिचनव्यज्यं
तएवाचलांवमल्पादनुमीयंतेचसरितांस्रोतस्विनीसंततिः स्वच्यंतेपरिसंडलेनतरवोनीलांबुदश्रीमुषामंदमंदमुपैतिलोचनपथंयाद्यांदशांसंदिनी ९ पुनर्विलो
क्यसाश्चर्यं गिरिवतटिनीयुल्मेदर्शनपदविक्रमादुपारूढैः अवरोहतिमयिरभसाद्भ्रियमाणोहतीवगगनतलं १० मुहूर्तमात्रादवतीर्णोस्मिहिमवदवकंद
मिं किंचिदंतरमवर्तीर्य परिक्रम्यावलोक्यच अयंहिशैलराजः उत्सारयन्निवविभातिनभोवकाशंभृंगैर्विहारभवनैरिवतुंगतायाः आभोगवद्भिरमृतांशुकरावदा
तैराक्रामतीवकटकैर्हरिदंतराणि ११ अतिरिच्यतेखल्वयमसाधारणेनधुरंधरेणभूम्नामंदरगंधमादनप्रभृतिभ्योमहीधरेभ्यः यतः त्रिभुवनगुरुणागुरुणा
तिरागाब्जमलभुवाकलिताधिपत्यलक्ष्मीः अविरतमनुशास्तिदेवतात्मासकलमिदंकुलंशैलचक्रवालं १२ तदहमधुनाकिन्नरीगीतनिष्यंदकृष्णासारंगचमरी

जालबालविक्षेपविभ्रंगलीकचंद्रोदयविलासेनकस्तूरीपरिमलापोहृतगमनागमनरोधनंशैलयूथीनाकटकवर्त्मनाप्रस्तुतसाधनायप्रविशामियावदोषधिप्रस्थं तथा
कृत्वा पुरावलोक्य इदंतदोषधिप्रस्थं विपुलकनकशृंगोपांतविश्रांतमंथरतरुवरशाटीशोभमानोपकंठं मणिभवनमहोभिस्मृज्यमानेंद्रचापंदयतिमम चेतोमंदिरंवि
स्मयानां १२ पुरुषवेशंअभिनीयावतीर्य दृष्टिंकृत्वा इदमभ्रंलिहगोपुरशिखरावलीढनक्षत्रपथंहैमवतमायतनं प्रवेशंनाटयन आकाशभोकंचुकिन्कुप्रवर्ततेकुलाच्च
लचक्रवर्ती किम्ब्रवीपिदेव्यामनयासाधेकिमपिमंत्रयन्नभ्यंतरमंडपमधिवसतीति तर्हिसाधीयानवसरः कार्यनिवेदनस्य इतिपरिक्रामति ततःप्रविशतिहिमवान्मे
नानुगतःपरिजनश्च हिम० दंकिकन्यापितवंखलुगृहमधिनो अधिकदुःखभावहति अस्मत्कुलालंकरणमियंचगौरीपरिणययोग्यादृशांपतिंपश्यत तथाहि आ
भोगशालिकुचकुड्मलनाथताक्ष्यावकाशमणिवांछतिसन्निरुद्धं अभ्यस्तनास्तिदचसांविषयेदलग्नेतन्वीसमुद्गसतिकाचनरोमलेखा २४ मेना छा० यथा
र्थपुत्रआज्ञापयतीतथाविवाहयोग्यासंवृत्ता हि० देविअन्यदपिश्रूयतां कुचयुगलंपरिवृध्यंयथायथावृद्धिमेतितन्वंग्याः वरचिंताहृतमनसस्तथातथाश्यमेतिमेगा
त्रं २५ मे० छा० ममापिरात्रिंदिवंभावितस्मिन्नेवार्थेनिहितहृदयायाःकिन्नलक्ष्यते हि० पुरावलोक्य देविवीणाविहारासुनिरतैवाभिवर्तते तदर्घ्यमानीयतां
मे० छा० यथाज्ञापयत्यार्यपुत्रइत्यर्घ्यमानयति हि० उत्तोयसांजलिंबंधं भगवन्नभिवादये नार० अभ्युदयपरंपरावाप्तिरस्तु हि० आसनमुपनीयार्घ्यं
समर्पयति नारदःप्रतिगृह्णाति हि० सहर्षमंजलिंबध्वा स्वायत्तसिद्धाखिलकामनानांतवपरस्मिन्परिनिष्ठितानां भवादृशामागमनोत्सवोयंनलभ्यतेनूनम
होत्पुण्यैः २६ नारदः निःस्पृहरपिमादृशैस्त्वादृशाःसर्वाश्रयोपकारिणोगृहमेधिनःपुरुषादृष्टव्याएव हि० यदभिहितंभवतातदनुग्राह्येषु नार० किम
नुग्राह्यकस्यानुग्राह्यतायांवितर्कः किंच तीर्थरूपाभवान्स्मार्भिः अभिगंतव्यएव शिरसिनिपतितापुरापुरारेरधिश्वरेतवयत्रतावर्तीर्णा अमरसरिदंशपलोक
मान्यात्रिभुवनपावनतासुपपतितेन २७ हि० किमेवमतिभूमिभारोप्यतेभवतानिदेशपरिवर्तिजनः ना० अद्यप्रतिमरूपलक्ष्येगंगागौरीचकन्यकेभवतः हि०
एवमेतत् ना० पूर्वतयोःपुरस्तादनुरूपरमणसंबुधिंधात्रा २८ हि० अस्त्येतत् ना० हितीयायास्तेदुहितःकोनामवरोभिचेतस्तत्रभवतः हि० भगवन्निम
मेवार्थेचिंत्यमेननसिमहाननुतापः अस्याश्चदेव्याः ना० ननागलोकेनमनुष्यलोकेनदेवलोकेचसमोवरोस्याः एषाप्रभुर्यस्तनयांवदीयांसएवदेवःप
रिणेतुमीष्टे २९ हि० तमपिभगवानेवनिवेदितुंप्रगल्भते ना० आत्मगतं अस्त्येदानींसामान्यवचनेश्चंद्रचूडामणिर्निगूहितव्यः प्रकाशं मयाकिलत्र
णिधानचक्षुषादृष्टोयमर्थः यतः विश्वाधिकंकमपिवरंद्रयंतेदुहितात्रपस्थतेनपुनरसुमितिविशेषण हि० विश्वाधिकदेयेतावताकृतार्थोस्मि ना० पुण्य
नंकेनापिकिलावतीर्णापुरातनीशक्तिरियंस्फुरंती इमामसाधारणरूपलक्ष्मीनलोकसामान्यस्फुरांचतीयाः ३० ततश्चभवतादुहितेयंनयस्मैकस्मैचिन्निदिचि
स्तितव्या हि० नाहंभवदाज्ञालंघयामि ना० अभ्युदयस्यनिमित्तंअन्यदपिकिंचिदुपदिश्यते यतः अधीश्वरेरत्नभुविभुवनंदधानस्तेजसत्रयेणमहतावि
हितक्षणश्रीः अन्येपुरस्त्वपियदीश्वरशब्दवाच्यस्सोयंतपस्यतितटेतवचंद्रमौलिः ३१ हि० अस्त्येतत् तत्तावभवानंतिमागतमिदुशेखरंसपर्यायाकयाचि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

पार्वतीपरिणयनाटक तृप्तिमेतां हि० भगवन्निधिर्यैहिकासपर्या नार० अनुरूपसखीजनपरिवृतांदुहितरमिमांगौरीं समिद्कुशफलान्युपहरंतीं परिचरचंद्रशेखरमितिप्रेषयतुभवान् हि० तथा
२ करिष्यामि ना० आत्मगतं उपक्षिप्तबीजंकर्तव्यंचसामान्यवृत्त्यानिवेदितंतत्प्रथागतंगमिष्यामि घ० हिमवन्मयूखक्रमस्माभिरुन्मूलयितुं इत्याकाशेननिष्क्रांतः हि० विलो
क्य दिवापिदहनप्रभयादर्शयन्दिक्षुचंद्रिकां द्वितीयइवचंद्रोयमारोहतिदिवंमुनिः २२ देविश्रुतंखलुत्वयामहासनेवचनं मेनका छा० विश्वाधिकःपुरुषोनाथइति
हि० स्वगतं विश्वाधिकशब्दोपक्षेपेणकर्तव्योपदेशेनतुहितुरस्याश्चंद्रशेखरइतिसूचितः प्रकाशं देविनारदोपदिष्टमिदंमौलिसपर्यौविरचयितुंदुहितरंनियोक्तुमुद्युजा
महे इतिनिष्क्रांताःसर्वे इतिचथर्षांकः २ ततःप्रविशतिवनदेवतावरसंतिका छा० आज्ञप्तास्मिनंदीश्वरेणयथावासंतिकेनियमारिछतस्यपूजापुष्पाणिनंदनवना
दानयंति तद्यदादिष्टंनंदीश्वरेणतथाकाशमार्गेणगत्वासौरभवासितदिशामुखानिकल्पद्रुकुसुमानिनंदनवनादवचेतुंगमिष्यामि तथाकरोति ततःप्रविशतिरंभा रंभा छा०
तारकासुरवंदियहणसाध्वसशंकितोप्सराजनोमहांसरुद्यानिलीनआसीत् अहंपुनःकुबेरनंदनंनलकूबरंक्षणमपिविहायजीवितंधारयितुंनपारयामि ततस्तस्मै
वाणिसरामिइत्यवतरति वासं० रंभांदृष्ट्वा छा० अयंप्रियसखीरंभासमागछति तदुपसर्पाम्येनां तथाकरोति रं० अथहिसवकुटकवासिनीवनदेवतावासंतिका
भद्रंप्रियसख्यै वासं० छा० प्रियसखिकिमत्रागता रं० छा० तारकासुरवंदियहणसाध्वसशंकितोप्सराजनोमहांसरुद्यानिलीनावतते वा० छा० सत्यंसतादृशो
दृष्टशीलः रं० छा० कुबेरनंदनंक्षणमप्यदृष्ट्वानशक्नोमिजीवितंधारयितुमितिप्रियसखीस्फुटतरंजानाति वा० छा० स्फुटंजानासिप्रसिद्धः खलुयुवयोरन्यो
न्यानुरागः रं० छा० ततोहसत्कर्णाकृष्टनंदनकोदंडनिरंतरनिस्सरच्छरनिकरहृदयाभिसरामिवंचयित्वासखीजनान्तलकूबरं वा० छा० युज्यतेतां
दृशानुरागस्यैदृशीव्यापारः रं० छा० क्वपुनःकुत्रगछसि वासं० छा० नित्यानंदस्वरूपस्यलोचनमात्रबांधवस्यभगवतोनीललोहितस्यपूजा निज
पुष्पाणिनंदनवनादानेतुमाज्ञप्तास्मिनंदीश्वरेण रं० छा० प्रियसखिअस्त्यभिनवस्तत्रवृत्तांतः वा० छा० अन्यःकोवानास्तिपितुर्निदेशेनसपरिजना
पार्वतीदिवसेदिवसेचगत्वामहादेवमाराधयति रं० छा० किमाराधनस्यफलं वा० छा० परमेश्वरस्यप्रसादः रं० छा० युज्यते गछत्वंप्रस्तुतंकार्यं
कर्तुमहमप्यथासंकल्पितंकर्तुंगमिष्यामि इतिनिष्क्रांतविष्कंभकः ततःप्रविशतिविविक्तस्थानमंडपमधिवसन्महेंद्रः २ मंडपद्वारंविलोक्य कः कोत्रभोः
प्रविश्यदेवनंदी स्वामिन्नयमस्मि महेंद्रः महत्कारणंविचारणीयमस्तिअतोबृहस्पतिमंतरेणनान्यः प्रवेशनीयः देवनंदीतथेतिनिष्क्रांता ततःप्रविशतिबृह
स्पतिः पुरोवलोक्य अयमिहमहेंद्रोविविक्तस्थानमंडपवर्तते एषखलु कोश्चिन्नेंदीलितदनुजंबध्नमालोकमानः कोश्चित्स्थन्नमरस्कृशांसस्मिता
न्याननानि कोश्चित्सेवाविहितमनसामंजलिंवीक्ष्यमाणः श्वेतेचिंतापरइवपुरोदृश्यतेवासवोसौ २ तदेनमुपसरामीत्युपसर्पति इंद्रः बृहस्पतिंदृष्ट्वाइहो
पविश्यतां बृह० तथेतिभद्रासनांतिकमुपविशति प्रविश्यदेवनंदी स्वामिन्देवदूतोदेवलोविज्ञापयतिविज्ञाप्यंमेकिंचिदस्तीति महेंद्रः तर्हितमेकंब २

शय ततःप्रविशतिदेवदूतः अयंहिस्वामी बृहस्पतिनाकिमपिमंत्रयन्वर्तते तदेनमुपसर्पामीत्युपसृत्यजयतुस्वामी महेंद्रं० विलोक्य देवलकिमद्यिनइदवि
लोक्यसे देवदूतः अतिभृशंगतामस्करपीडांस्वामिनेविज्ञापयामि म० माभैषीः कथयतेषामद्यमे दे० उक्त्वाक्षमरदीर्घिकाजलमुवासभारुहाणांततिस्खेरनंदन
पादपानभिमतानामूलमुन्मूल्यच हत्वावांछितवस्तुदानचतुरातामर्जुनीदुर्जनाः इत्यर्धोक्तेविरमति म० अवशिष्टंकथ्यतां दे० स्वर्गस्त्रीणांकरग्रहरचयितुंनिःशंक
मुद्यंजते २ म० देवदूतकुलिशसहायमद्यादोजायतेकिंमवमतिशंकाक्रियते पश्य वृत्रंबलंचनमुचिंचकधावशंकृत्वाविधायकिलपर्वतपक्षभेदं त्रैलोक्यशिक्षणपटो
र्मंतारंकस्मिन्वधावरः किमुसहायमंतराय: ३ तत्कतिपयैरहर्दिवसैस्तत्प्रतिक्रियाभविष्यतिगछत्वंसमुचितंनियोगकरणाय देव० तथेतिविष्क्रांतः म० युक्तमितः
परंविधातव्यंयदादिष्टंभगवतोविरिंचिना यथापूर्वंकरवतारकदनुजाक्रांतिमसहमानैरस्माभिरमरपरिषदासार्धंभगवान्परिछतः पद्मयोनिराचष्ट यथासंनान्यमंतरेणान्य
नतारकान्हंतव्यः तदुत्पादनेचायमभ्युपायः हैमवतकटकर्तदशशांकचूडामणिरुपस्तनुते यत्नेनयंनकंनचिदरुक्षणमपीसपार्वत्यां ४ ततस्तयोरात्मसंभवंसनान्यकुमा
रेणदानवारथसिध्यैविष्यतीति म० तत्कथंगिरिजागिरिशनपरिणाह्यते कदावातदुत्पन्नः कुमारःपूरयिष्यतिनामनोरथं बृह० नंदीश्वराणाव्याहृतयोव्यभिचरंति मे०
स्मरणंसहर्षंच विरिंचसमादिष्टमस्मत्कार्यमपिअंगीकुर्वतीवपितुर्निदेशनसपरिजनापार्वती दिवसेदिवसेसमागत्यभगवंतमेदृशंस्वरंपरिचरतीतिरंभासुखादश्रौषं बृ०
यंयंवसिध्यनःसनीहितं म० किमेतावता मुग्धेश्वरसोविलासस्मितंवीक्ष्यमनोहारिणिःकर्णांतस्त्रलितैरपांगवलनैरारचितपल्लवंते बाहोःस्वस्तकुचोत्तरीयचपलनामं
जुक्कणत्कंकणव्यापारैरपियाविकारपदवीनप्रापितःसंयमी ५ तस्यपुनरचिंतनीयमनवधिकानंदसंदरमनादिनिधनमनंजनमगुणमक्रियमात्मानमबाह्य
नचक्षुषासाक्षात्कुर्वतःसमुपहृताखिलदुःखकलनाविकल्पस्यस्वतंत्रकर्तृश्वराचरगुरोर्भगवतश्चंद्रमौलेः क्रियद्दीकरणंगौरीपरिचरणं बृ० मधवन्मन्यथैव
तिसामान्यांसुवतानमन्यथा: यतः आसंचनकतनुश्रीरंतःकरणस्यकिमपिसंवलनं सारवलुगिरिराजसुतासंमोहनमस्त्रमवपुष्पधनुः ६ सहर्षं पुष्पेषु
रिक्तपाद्यांतेनस्मारितोस्मि सप्तर्षयोगिरिजागिरिशयोर्घटनेपटीयानिति बृ० सहर्षं त्रैलोक्यशासनदक्षतावदीमतिरर्जिता शांतिकपौष्टिककंदुशंकानः कंव
लंमतिः ७ यतः मदीयापिबुद्धिरिमांवितर्कपदवीनावतीर्णा तदविलंबितमेवसमाहूयतांकामः महेंद्रं० कः कोत्रभोः प्रविश्यदेवनंदी स्वामिन्नियमस्मि महेंद्र
देवनंदिआहूयतांझटितिकामः देवनंदीतथेतिनिष्क्रांतः ततःप्रविशतिरतिवसंताभ्यांकामः सरथवसंतकिमकांडस्वामीमहेंद्रःसमाहूयति वसंतः एवमन्यै आ
द्रीपराधकलुषीकृतयाकयाच्चिदावुद्धरोषमभिमानवशंवधतः संमोहनंनभवतःकिलसायकेनतस्याविधातुमभिवांछतिचित्रभेदं ८ कामः उपसृत्यसहर्षं
स्यामइत्युपसर्पति महेंद्रं० विलोक्यसहर्षं सुखरसधुपमालोचारमोदःसनाथंत्रिभुवनजयमाद्यंचापमेसंदधानः सुखसुदितविलासंवीक्ष्यमाणः प्रियायाः
सहमधुरिहमंदंमंदमायातिकामः ९ कामः रतिवसंताभ्यांसहोपसृत्यचापंगर्भिणांजलिनासविलासंप्रणमति म० आसनांतिकंहस्तेननिर्दिशन्सखेकाम
इहोपविश्यतां कामःरतिवसंताभ्यांसार्धमुपविशति बृ० अयंतानीयंभवंतंस्वानेखलुमानयतिमहेंद्रः कामः अंजलिंबध्वा त्रिलोकनाथस्यतवातिशक्तेः

किमस्तिकार्यमधवन्मयापि प्रकाशितार्शोपदिशावकाशोदिवाकरोदीपमर्क्षेपर्तकिं १० बृ० माभैषीर्मनेपमाच्चष्ट असावलोकसामान्यचापविद्याधुरंधरः करानुका
र्यसकलंबाहुस्तवदिवौकसां ११ म० सखेकाम चक्रेणविष्णोरपियद्दुरापंतरस्विनावाशतकोटिनामे तत्साधयंयुष्मयंयंवदस्त्रमद्यैवानङ्गतबाहुवीर्यः १२ कामः सगर्व
स्त्वामिन्यस्तेसापत्न्यमाचरति दनुजोवामनुजोवामुनिरपिवामुग्धचंद्रचूडोवा सकललोकसुंदरीणांसभवतुबद्धः कटाक्षशृंखलया १३ म० बृहस्पतेमुखमवलोक
यति बृ० अथैकामयस्त्वयाचरमार्थः परिगणितःमुग्धचंद्रचूडोवेति सइदानींशंकरःशैलराजस्यकटकरीन्निनिरतिशयातिशीतलांतःकरणःतपश्चरति का
मः ततः २ बृ० तयास्संमेलनेदिविषदांरुमहतीकार्यसिद्धिःसाचभवंतमेवकटाक्षयति का० आत्मगतं अहोअनात्मज्ञतादिपुंसांआत्मनिधनमापादयति
यदहमात्मप्रशंसापरवशःपरमेश्वरमपिसामान्यवत्यापर्यजीगणं वसंतः आत्मगतं अन्यदुपक्रांतमन्यदेवापतितं क्वायंसुगंधिविशिखःक्वदमानच्चापःस्त्री
णांवशीकरणकर्मणिजागरूकः क्वासौललाटनयनानलविस्फुलिंगवार्तावशेषितपुरत्रितयोमहेशः १४ रतिः अहोअत्याहितमपतितं यत्खंडपरशुर्ज
तव्यः का० यत्परिजनपरमाणोर्मन्त्रोपिमत्प्रभुजःकार्यमिच्छन्ति तदात्मव्ययेनापिकर्मकर्तुमुद्युंजे म० संमोहनंतवशरःसहितमात्रिगिरींद्रकन्यायाः मु
खमुदितमुग्धदृशंविलोकयतिमुग्धधूर्तिरीशः १५ तदीपकंरस्मिन्नर्थेभवतानशंकनीयं का० व्यजन्यास्यामिकार्यायत्राणान्त्रियतमानपि यशश्च
शरममलंभवंतंद्यनुषंगिणः १६ तद्यथादिष्टंस्वामिनांतथाकरिष्यामि महेन्द्रोबृहस्पतिश्चहस्तमुद्यम्य अस्त्रिस्वस्त्ययनंतवायमरुतांसत्याशिषामा
शिषस्त्वांरक्षंतुयशश्चतेस्फुविपुलंलोकत्रयेदीव्यतु शौर्यंत्वद्भुजयोरिदंचभवतात्सुखादपुखोदयंकिंचिद्योगमिमंसमर्थयतुनःस्वछंदचेष्टाविधिः १७
कामःरतिवसंताभ्यांशंकमानोनिष्क्रांतः म० गुरोर्विरिंचेदेशानुरूपमस्माभिरेतावदनुष्ठितंसिध्यंभगवतीनियतमेवत्रभवति बृ० अहमपित्रस्कृतकार्य
सिद्धयेकुलदेवतांप्रार्थयितुंगमिष्यामि इतिनिष्क्रांताःसर्वे इतिद्वितीयांकः २ ततःप्रविशतिमहेंद्रोबृहस्पतिश्च महें० गुरोकिंनामकामःकेना
पिबाणसंधानेनखंडपरशुंवशीकुर्यात आहोस्वित्संवर्तदिनकरदुष्प्रेक्षंतमुनिमीक्षितुमशक्नुवन्निवर्तेत अथवाकोपांधकारंचेतसामुनाभाळनयनपा
वकस्यपुरोडाशतांनीयतेकथंभविष्यतीतिनजाने वामाक्षिस्पंदनंसूचयित्वा साशंकं अदक्षिणमिदंचक्षुःस्फुरितंशंसतीवमे देवकार्यविघातायजाय
तोवामतोविधेः २ बृह० प्रतिहतमंगलं भगवन्ननेननिमित्तेनज्ञाप्यतेवृत्तांतज्ञेनकेनचिदागंतव्यमिति ततःप्रविशतिनारदः २ मघवंदेशनरछाण्वा
श्रमंगत्वात्रत्यमुदंतंविज्ञायसमागतास्मि तदेनमुपसृत्यनिवेदयिष्यामितत्प्रभृखिलमुदंतमितिपरिक्रामति महें० विलोक्य अयमेवमहतीवत्सलो
मुनिरुपसर्पति तदासनमुपनीयतां बृ० आसनमुपनयति नारदउपविशति म० अंजलिंबध्वा भगवन्कथयभद्रमभद्रंवादिविपदामभिलषितं

नार० सर्वमादितःप्रभृतिकथयामिश्रूयतां म० अवहितोस्मि ना० तथादेवकार्यायप्रस्थितंकंदर्पतिरस्करिण्याविद्ययाप्रच्छन्नोदृतांतंजिज्ञासयाचन्दिदेशादच
रं म० ततस्ततः ना० तत्रस्थाण्वाश्रमसंनिधमासाद्यकामोवसंतमभिहितवान् म० कथमिति ना० सखेवयास्मिक्रिमवदुपकंदकाननंविजृंभितव्यमिति म० त
तःसकिंकृतवान् ना० वाचालयन्मधुकुलानिवनंघ्रियाणांकुरयन्मलयमारुतंकंदलानि सरव्युःप्रसूनविशिरवस्यभुजावलेपंसंवर्तयन्मधुरजृंभतकाननेषु २
म० ततः २ ना० दत्तंप्रियाभिर्बहुमानपूर्वमास्वाद्यचूतासवमन्यपुष्टः आमंदिभिःपंचमरागभेदैःप्रबोधयत्पंचशरावलेपं ३ म० ततः २ ना० आधूयचंदनतरु
नूत्तमनद्यास्वरंगमालिंग्य आदायकमलेसौरभमंकुरितामलयशैलपवमानः ४ म० ततः २ ना० चूताःकोरकितावृहायसदृशांहस्तांबुजामर्शनंतत्पादांबुजता
डनेरपिविनाकंकेलयःपुष्पिताः तत्संगीतकसंतरणहसितारम्याःप्रियालद्रुमामुक्तातद्वदनासवंसकुलितागंधोत्तमाःकेसराः ५ म० ततः २ ना० आदायच्चा
पमधिरोपितषट्पदज्यंतस्मिन्क्रिमाचलमुपेयुषिपंचबाणे वेलातिलंघिकिमपित्रणयातिरेकाद्दृष्टानिलोल्यमभजंतविमोहितानि ६ म० ततः २ ना० किंबहुना
तस्मिन्वनेनिवसतामनुकूलमेतिलंघ्यंधैर्यमर्यादा अबलासुनिर्ममानामासीदतिरागसिंधुरुद्वेलः ७ म० एवंसकलजनविसारिणिप्रकृतेकिंकृतवान्कामः
ना० सकामोरत्यावसंतनचान्वीयमानोमहतिदेवदारुमंडपनारक्षचर्मनिर्मितास्तरणायांहिमशैलवेदिकायांआसीनमंतर्मुखनिहितचित्तवृत्तिमपश्यंतरपदानि
राधनिश्चलाननेनासाग्रनिहितपक्ष्माण्यक्षीणिधारयंतमपरमिवनिस्तरंगमंबुधिंतमिंदुशेखरमपश्यन् म० ततः २ ना० ततोभगवानपिनीलोत्पलोहितः
प्रतीचविलोचनेनप्रत्यंचमात्मानपराक्षीकृत्यशिथिलितपर्यंकबंधनःप्रणिधानाद्व्यरंसीत् म० ततः २ नार० ततःसकामस्तद्दर्शनेनकरतलविधृतकार्मु
कःकर्तव्यमपरमजाननक्षणमालिखितइवभयादतिष्ठत् म० ततः २ ना० अत्रांतरेहरमुपासितुमभ्ययासीद्वासंतिकप्रसवकल्पितमंडनश्रीः शृंगार
वीरतपसामधिदेवतेवसाकंसरवीभिरवनीधरराजकन्या ७ म० ततः २ ततःसकामोलब्धावलेवइवसमाश्वस्यदृष्टिप्रतीपविहारणपाश्चात्यभागमा
श्रित्यसमयंप्रतीक्ष्यस्थितवान् म० ततः २ ना० पार्वतीचसखीपरिष्वक्तमृष्टमूर्तिमृष्टांगस्पृष्टभूमिरवंदिष्ट म० ततः २ नार० अनुरूपरमणमासादये
तितामाशिषावर्धयद्धर्चंद्रमौलिः म० ततः २ ना० ततःक्षणेतस्मिन्नयमवावसरइतिकामःकार्मुकेसंधायसंमोहनंबाणं मु० ततः २ ना० तदनुयुग
पद्दीशःपार्वतीवक्त्रपद्मस्मितविकसितगंडभ्राजिणीलोचनानि म० ततः २ ना० पुलकिततनुरंतर्भावमावेदयंतीदरनमितमुखेंदुःसाचसव्रीडमस्खलत् ८
म० ततः २ नार० ततोभगवानंतःकरणंतपोबलेनसंयम्यतत्कारणायविधूयविलोचनानिव्यापारितवान् म० ततः २ ना० आसीदपश्यदधिसंहितमोहना
स्त्रंकर्णावतंसपरिकल्पितकार्मुकज्यं आकुंचितैकपदमुच्चलितान्यकायंलक्ष्मीकृतात्मवपुषंमदनंमहेशः ९ मु० सभयं अवशिष्टं कथ्यतां ना० तदनु
कुपितस्यभूलिनःफाललोचनादुड्डंभज्ज्वालावलीजटिलोग्रासलालसइवकालानलोवह्निः म० सनिर्वेदं किमतःपरंनिवेद्यते ना० तेनमदनःल

लाटजैनशलभशतानीतः मं० मूर्छति ना० समाश्वासयति मं० आश्वस्य द्राघुवनरमणीयपुष्पबाणसकलजनानंदनपुरंदरस्यार्धस्थिक्रूजीवितानि वृ० मघवन्मा
विषीदभवितव्यताहिबलवती तदास्तांरतिः किंकृतवती ना० रतिरपिमाहंघ्राघ्रा मं० किंकृतवान्वसंतः ना० माहंघ्राघ्रः स्वयावसंतोपि मं० मूर्छितोरतिवसंतोकिमनुतिष्ठतां
ना० प्रथममाश्वास्यतंनमधुनाकथंचित्संज्ञालंभिता रतिरपिपुनः परुषपवनविधूयमाणपांसुपटलंभासितमयपुरुषाकृतिपत्यरंगमालिंग्य गुरुतरशोकापहृताकुररीविप्र
यतियोगमापन्ना आक्रंददार्तनादंबाष्पस्खलितान्तस्तनीबाला २० मं० ततः २ ना० तदनुहानाथंतिविलपंतींरतिमाश्वासयदाकाशसंभवावाणी यथा मुंचशोकमसि
द्रवल्लभालभंलंध्यतेजगतिकंनकत्र्यता उद्भविष्यतिपुनश्चेतपतिः पार्वतीपरिणयेपिनाकिनः २१ इति मं० समाश्वास्य सहर्षमिद मन्मानसोरथोमेपुनरंकुरतां
किलायमुद्यंक्ष्यति दावाग्निलीढदेशपल्लवरुचिरधारोधरेणसंसिक्तः २२ वृ० मघवन्सत्यंवदत्यसौवाणीसर्वथाकामःपुनरुद्भविष्यति मं० ततः २ ना० ततःकिंचित्स्वस्थ
श्चरत्यरतिः नीतासमानदुःखेनमधुनानिजंभवनं मं० कामंकथावशेषंकृत्वाकालकंटः किमकरोत् ना० स्त्रीसन्निकर्षपरिजिहीर्षयासहभूतगणेन भूतपतिरतथ्यं
नमकरोत् मं० किंकृतवतीपार्वती ना० आगत्यदोर्भ्यांनादायलज्जानुकुलितेक्षणा नीतानितांतवात्सल्याद्गौरी हिमवतागृहं २३ मं० पन्नगबन्धारद श्रुतं श्रोतव्यंकि
मतःपरंव्रतिपद्यते ना० पुनरिसंचरवृत्तांतंसत्यलोकवर्तिनंचतुर्मुखायनिवेदयितुंगमिष्यामि इतिनिष्क्रांतः ततः त्रयोविंशतितमोंऽ २ छा० कुंबरभवनान्निवर्तमानोयो
षधिप्रस्थनगरंयामयाकर्णितोवृत्तांतस्तंस्वामिनंविज्ञापयामीतिपरिक्रामति मं० विलोक्य संचारिणीववल्ली विद्युल्लतिकेवचापलोन्मुक्ता सोहनकलेवमूर्तिः कांक्षिदि
यंकमलपत्राक्षी २४ निरूप्यरंभास्वल्पियं रंभा उपसृत्यजयतुभर्ता मं० रंभेकुतआगम्यतेभवत्या रं० छा० कुंबरभवनात् मं० किमस्तिंतत्रापूर्ववृत्तांतः रं०
छा० नीललोहितजटालाग्निज्वालाजालेनकथांशेषितः कामइतिसर्वंभणति अन्यच्चकिमप्योषधिप्रस्थनगरे मं० किंतदन्यत् रं० छा० मन्मथदाहेनभस्म
मनोरथापरमेश्वरंपतिमभिलषंती पार्वतीकठिनस्तपश्चरणेरात्मनाभिलाषंपूरयितुमिच्छति मं० किमुक्तमस्मिन्नर्थेमातापितृभ्यां रं० छा० मनयादेव्यापर्वणिते
मं० किमिति रं० छा० परुषपवनोपविशंपस्तवपुनरंगशिरीषसुकुमारं व्यवसितमंतःकठिनंपार्वतितस्माद्दुष्करंव्रतमिति २५ मं० किमुक्तंहिमवता रं० छा० अस्मा
न्नुमितंतेन मं० रंभेसाधीयांसमुदंतमानीतवती गच्छत्वंसमुचितनियोगकरणाय रंभा० छा० तथेतिनिष्क्रांता नेपथ्ये वैतालिकः आर्द्रयघणयांदिवस्त्वतिगंत
दशांतरंपश्चिमोसादुत्तस्यांदियोगमक्षमतयागलायत्सरोजाननां संध्यावल्कलिनीं हिरण्मयपरिषद्दुद्राक्षमालावतीं तत्त्वान्निस्पृहयेवसंव्रतितपःसक्तांसमालक्ष्यते
२६ मं० वयमपिसंध्यांवंदितुंसाधयामः इतिनिष्क्रांताःसर्वे इतितृतीयांकः २ ततः त्रयोविंशतिमुनिविग्रहोनंदी २ आज्ञप्तोस्मिभगवतानीललोहितेन
यथानंदिन्मन्मथदाहेनभस्ममनोरथापार्वतीमन्निबंधेनभावनमहांतंनियममनुतिष्ठंतीं गौरीशिखरिनाम्निपितुः शिखरंतपश्चरति तपस्यंत्याश्चतस्याव्यतीतोबहु
तिथः कालः तद्भवान्गृहीतमुनिवेषस्तत्रगत्वाकीदृशीवातस्यानियमःकीदृशीवाभिलाषबंधइतितत्सख्योजयाविजयाभ्यांसंवेनविदित्वापुनरागच्छत्विति तत्त्व
र्भानियोगमनुतिष्ठामीतिपरिक्रामन्विमृश्य प्रकृतिकठिनानिखलस्त्रीणांचेतांसि तथाहि एषाशिरीषसुकुमारशरीरयष्टिश्चंद्रीकलेवनयनोत्सवमावहं

तीं संचेतुमिच्छतिशिलाकठिनेशशरीरैस्संपादितान्यपितपांसितपोधनानां २ अपिच शेतेयाकिलहंसदुकूलशयनेनिद्रातिसारडिंडीरपत्रेयामृदुलंदुकूलमवलाश्रुत्कांति
सावल्कलं यावाचंदनपंकलेपशिशिरधारागृहवर्ततेपंचानामुदितोष्णदीप्तकिरणांसामध्यमासेवते २ ततः त्रयोविंशतः कुरुसापचत्वमाचरंत्यांजयाविजयं जया छा०
हलातपश्चरणेकृतमत्याप्रियसख्या गौर्यामनोरथकल्पद्रुमः कदाफलंदर्शयिष्यति विजया छा० हलाजयेतदासन्मथदाहपरपरिहृदयो निपुरुणयाप्रथमंनिदर्शनभूतः पर
मेश्वरायदार्द्रहृदयोभविष्यतितदाफलंदर्शयिष्यति इतिपुष्पावचयमाचरतः नंदी इमरवलुतस्याः प्रियसख्यो जयाविजयेयावदुपसर्पामि तथाकरोति जया छा० इ
लासमपुष्पकरंडंपूरितंपुष्पैः तदपुनः कथं विजया पुष्पकरंडंविलोक्य छा० ममपुनरर्धपूरितंअवशिष्टंपूरयिष्यामीतिपुष्पकरंडंपुष्पैः पूरयति नंदी उपसृत्य भद्रंभवतिभ्यो
जयाविजये भगवन्नंदावः नंदी कथंवांकिंनिमित्तंवापुष्पावचयमाचरथ उभे छा० आवांहिमवतःकन्यायागौर्याः प्रियसख्यौ तपश्चरणनियमरुंधानायास्तस्याःदेवपूजापु
ष्पाण्यवचिनुवः नंदी किंनिमित्तंवातपस्विन्याः जया छा० अनुरूपंवरलभेयामिति नंदी कासावनुरूपावरः ज० छा० यंकिलवदंतिवेदानित्ययुवानंपुराणपुरुषंच
यःकिलधारयतिनित्यमीश्वरंशंचचंद्रलेखांच २ छा० एषानःप्रियसखी तमेवपरमेश्वरंपतिमभिलषंती मंदंद्रमुखान्लोकपालानवमान्यतपश्चरणंकरोति किंचित्
न्मथदाहेनदुष्करंपितुर्गृहंत्रयोविंशबलवदुल्लंघितासीत् नंदी तत्कथमुच्यतां जया छा० पांडुक्षामशरीराऽतिदीनमंदनसरसिरुहा क्षीणापार्वतिनलिनीत्रस्तत्रइवदि
रहग्रहेण ४ नंदी ततःपरंकथमासीद्वांप्रियसखी जया छा० शीतंवारयतिरतिचंदनादिपवनस्पर्शनसंमन्यतेसल्यंपल्लवकल्पितंनसहतेचंद्रातपंनिंदति नावापद्म
पलाशनिर्मितस्तनत्रावारंक्षमत्यंतसानीद्वारशिलातलेशृण्वुपरंतद्दुष्करंवर्तते ५ नंदी एवंत्रबलमदनज्वरासापश्चात्किंकृतवती उभे छा० पश्चात्किमप्युपायंती
तपश्चरणेःपरमेश्वरमभिमुखीकर्तुंघटनायथातीव्रनियमंकरोति नंदी कथयतीदृक्प्रभुपतेस्तस्यानुरागः जया छा० अन्योन्यंपुनःसमुद्दान्दृष्टिरागः जया
छा० अन्योन्यंपुनःसमुद्दान्दृष्टिरागः अतःपरंसएवजानाति नंदी तत्किमनेनसंदिग्धफलेनदुर्लभत्रार्थेनानिबंधेन उभे छा० भगवन्निदमावयोः प्रियस
ख्याव्यवसितं यथापरमेश्वरंपतिंलभेयं अन्यथातीव्रैःकठिनैस्तपश्चरणैर्विलीनाभवामीति नंदी आत्मगतं श्रुतंश्रोतव्यं तमिमंवृत्तांतंनीललोहितायानिवे
दयामि त्रकाशं भद्रंयथागतंगमिष्यामइतिनिष्क्रांतः जया आवांप्रियसख्यैपूजापुष्पाण्युपहरावइतिनिष्क्रांते मिश्रविष्कंभकः ततः त्रयोविंशतिंनेष्किकभूमिकाव
लंबीशंकरः २ आत्मानंनिर्वर्ण्य पर्यायेणयंभूमिकापार्वतींत्रतारयितुं तथाहि अंसेकृष्णाजिनश्रीस्त्रिगुणविरचितांसरलाश्रोणिभागेपाणावाषाढदंडोभसित
विरचितपुंड्रकंफालदेशे दर्भाक्लिन्नपवित्रश्रवसिपरिणमन्मानतुंगीपिशंगीमौलौपंक्तिर्जटानांजपवलयमिदंस्फाटिकंचत्रकोष्ठे ६ विचिंत्य यत्सामन्मथमोह
नास्त्रसमयेसापत्रपाचारुणावस्त्रेणस्मितफुल्लगंडफलकंवीडाविलोलेक्षणं उन्मीलत्पुलकांकुरंरसितवती त्रांत्रवरूपान्तरंतन्वी तत्पुनरद्यचेतसिसमत्रादु
र्भवत्यंजसा ७ तदिदानीमेवगाढतरतरिणिकिरणक्लांतामिवसंदिनीमेघश्चातकीमिववातयोर्विशंपतस्तामनुपत्स्ये यद्येवंजयाविजयाभ्यांनिवेदितोभाव

बंधस्तस्यानंदिनामद्यमर्पितस्तेदेवात्मानमपराकर्तुमिवाधारयामीतिसविनयंपरिक्रामति ततः त्रयोविंशतिजयाविजया श्चामन्त्र्यमानातपस्यंती पार्वती वामाक्षिस्पंदनंसूचयित्वा छा० हलेप्रियसख्यो आनंदबाष्पशिशिरमकारणंस्फुरतिलोचनंवामं तन्मेमंदभाग्यायाजायतास्याद्यकिंनुफलं ९ उभे छा० हलापार्वतिस्त्रीणांवामाक्षिस्पंदनंपुरुषाणांदक्षिणाक्षिस्पंदनंसुशकुनमितिपौराणिकाभणंति तथामन्मथदाहनिष्करुणोपिपरमेश्वरः कस्यापिमुनेर्मुखेनात्मानुग्रहीष्यति पार्वती छा० सत्यंभवदुच्यतेसख्यावचनं शंभुः पार्वतीदृष्ट्वा केदंतपः कठोरंकेदंसुकुमारसंगमबलायाः दिवसः कुत्रघनोष्माकुत्रचकमलकोमलाचंद्रि ९ अहोमहांततपः क्लेशमनुभवतिमामुद्दिश्यमज्जभाषिणी जया विलोक्य छा० हलापार्वतिगृहीततनुरिवतपः प्रभावोयुवीकोपिमहापुरुषइतोमुखआगच्छति पा० छा० आगतानामतिथीनांयुवाभ्यामर्चनाकर्तव्या अहंपुनर्यथापूर्वंनियममनुतिष्ठामि इतिमौनमवलंबते शंभुः निर्वर्ण्य आभातिवल्कलवतीपांडुक्षा मामदीयविरहेण घटितकलेवचंद्रिसंध्याशकलेनसंवीता २० इतिसमीपमुपसर्पति जयाविजये विष्टरमुपनयतः शंभुः उपविश्य मार्गपरिश्रमंनाटयति पार्वतींसख्यौविलोकयतः वर्णिनंतालवृंतेनवीजयतः शंभुः हस्तमुद्यम्य गतःश्रमोस्माकंअनन्यसामान्येनभवतीनांसौजन्येन उभे सविनयं कृतआ गच्छतिमहापुरुषः शंभुः अद्यैकलासाद्यागम्यते जयाविजये यद्यवमर्घ्यंप्रतिगृह्णातुमहापुरुषः शंभुः तथेत्यर्घ्यंप्रतिगृह्यरूपंधित्वा पर्वतंएकंबृहन्मपिल घीमोभवत्यै जया पृच्छतुमहापुरुषः शंभुः कस्यैयंदुहितेकेभवत्योकिंनिमित्तंवाकठोरंतपसिवर्तते जयावि० छा० एषावयोः प्रियसखी हिमवतः कन्यका पार्वतीनामधेयाऽऽवामप्यस्याःप्रियसख्यौ जयाविजये अनुरूपवरलाभनिमित्तंचास्यास्तपश्चरणं शंभुः जन्मान्तरेऽस्याः ब्रह्मणस्यधातुः पितागरीयान्नि रिसर्वेशामः वपुर्मनोहारिवच्चश्वरस्यंपदंचलोकादतिलोकमस्याः २१ तत्कोनयाप्रार्थनीयोनरस्त्रिलोक्यां जया अस्तिकोपिमहापुरुषः शंभुः कोसावा त्मसौभाग्यदुर्विदग्धः कठिनहृदया जया महापुरुषश्रृणुष्वतावत् यंकिलभणंतिवेदाइतिनेवपरमेश्वरंपतिमभिलषंतीनः प्रियसखी तपोनियमसमुपतिष्ठति शंभुः पार्वतींप्रति भद्रेऽपिसत्यमेतत् पार्वती मौनमुन्मुच्य महापुरुषयथाचक्षितेसखीभ्यांतथामनोरथः शंभुः आत्मगतं इदानीमात्मानिर्वेदंनिरूप्य व क्तुमस्याश्चित्तंपरीक्षिष्ये प्रकाशं सहस्ततालंहसन्नाह आलेपोपासितंविभूषणमद्विवासः पितृणांवनेवेतालाः परिचारकाः प्रतिदिनंवृत्तिश्चभिक्षान्नमेव इत्यस्यशुभैतराणिचरितान्याख्यंतिसर्वेजनास्तस्मिन्नोद्यवशान्नतिस्तवरुचिंबध्नातिकिंबहु १२ अन्यच्च जगत्त्रयीलोचनबालचंद्रिकाकुलस्यरत्नं भवतीक्वभूभृतः कक्वत्रिवासाः पितृकाननेवसन्नमंगलाचाररतिस्त्रिलोचनः २३ पार्वती कर्णौपिधायशांतंपापं २ शंभुः यद्यद्वर्तमनसिदृढतरंनिश्चयः वि धुंतुदंचंद्रमसीवदिकामयतेकला वरंवृणीताद्भवतीसंघत्येवकलापिनं २४ पार्वती मुखंवैवर्ण्यरूपयित्वा छा० यत्खलुकुर्वंतिनिगमास्सकलाअपिमौलिनान मस्कारं तंगिरिशंनिंदंतीतवजिह्वानभवतिनिर्भिन्ना २५ हलासख्यो महापुरुषनिंदाकरणंनतादृशंपापंयादृशंश्रृण्वतामपपुनर्ब्रह्मणईश्वरनिंदानिरंकुश

मुखः तस्मादन्यंतापसरामः इतिविस्रंसमानवल्कलंअन्यतः परावर्तते शंभुः स्वरूपंप्रकाश्य परिणाहिस्तनयुगंलंकृशमवलग्नंक्षमंतकिंगिरिजे तवहस्तदानचतुरस्र पसानुकृतोयमस्मिंदासजनः २६ इतिपार्वत्याहस्तमवलंबते पार्वती सभयविस्मयप्रहर्ष पुलकिततनुः प्रस्विन्नगंडाप्रतिपन्निमृढातिष्ठति जयावि० छा० प्रियं नः २ सन्निहितः परमेश्वरो ऽस्माकंसत्कर्मपरिणामे शंभुः आदिः श्रमांबुकणिकांसंगलत्तादंकुरितपुलकां आमंडितकुचभारामालिंग्यकृतीभवान्यद्रिगिरिजे २७ तदिमांगोधूलिवर्णविवाहनपाणीकर्तुमभिलषामि जयावि० छा० भगवन्नस्माकंप्रार्थनाव्यर्थाकर्तव्या यथासकलकुलाचलचक्रवर्तिनः तातस्यहिमवतोगृहेनिर्मित विवाहाकार्याप श्चावंत्रीछ शंभुः सनिर्वेदमात्मगतं इतःपरंकथमिमांविवाहितांवर्तिष्ये प्रकाशं भवतलोकयात्रानहातव्या जयावि० पंचदिवसाभ्यंतरेयथावि वाहमंगलंभविष्यतितथाक्रियतां शंभुः त्रिचतुरदिवसाभ्यंतरइतिवक्तव्यं तथाहि क्षणमपिविरहेणमप्रियायाः कल्पयतिकायसहस्रकोटिसाम्यं कतिपयदिवसघ्यो गमेनंकथमिवहंतसहिष्यतेमनोमे २७ इतिपार्वत्याहस्तंमुंचति जयावि० छा० वयंगछामोविवाहमंगलंसंपादयितुं शंभुः तथाक्रियतां वयमपिसप्तर्षयः नविवाह मंगलायूयंत्वरयितुंगमिष्यामः इतिनिष्क्रांताः सर्वे इतिचतुर्थंकः ४ ततः त्रयोविंशतिकंचुकी २ आज्ञप्तोस्मिसकलकुलाचलचक्रवर्तिनाहिमवता यथाशि लाधरपूर्वैरपरमेश्वरंत्रहिताःसारंधतिकाःसन्नपयःसमाहृत्यलब्धवरायादिवसमिदंविवाहमंगलयोग्यमकल्पयन् तद्भवताओषधिप्रस्थवासिनः पौराः पुरंप रिष्क्रियतामितिनियोक्तव्याइतितत्रभवानियोगमनुतिष्ठामि इतिपरिक्रम्यसर्वतोविलोक्य भोः २ सन्नद्धतांविचित्राः प्रतिभवनमिहश्रेणयस्तोरणानामुन्नम्यंतांसमंता द्गगनतललिहः केतकानांपताकाः संसिच्यंतांपटीरद्रवपरिमलजलैर्वीथयोमुक्तपुष्पंसंघाताःसावगाढाः परिणयदिवसोदित्यमांगल्यहेतुः २ आकार्शकिंब्रूथ भवद्भ चनात्यूर्वंनवसर्वमस्माभिर्द्विगुणमाचर्यतइतिसर्वतोनिर्वर्ण्य सहर्षं अहोस्मदादेशात्सांगेवप्रवृत्तमहोत्सवंनगरं तथाहि एषाचंदनमालिकाविरचिताचूतप्रवालेन वैरंभास्तंभपरिष्कृतेषुभवनद्वारेषुसंलक्ष्यते आमंद्रध्वनयः क्वणंतिमुरजामृच्छंतितंत्रीरवाः सिंजानेमणिभूषणैस्ततइतोनृत्यंतिवारांगनाः २ इतश्च उत्सर्पदाग रवधूपपरंपरापिशुनवह्निजालदागमोयं उन्निद्रतोरणमणिप्रभयास्फुरंत्यासंजय्यंतेचशतमन्युस्वरासनश्रीः ३ अन्यतश्चामुः धवलारुणमेचकै रपांगैरपरामारच्यंतिपत्रवल्लीं कुर्वंत्यर्युगलेपटीरपंकान्युनरुक्तानिवकुर्वंतिमृगाक्ष्यः ४ सर्वतोविलोक्य विक्षिप्तः सरभसमेपपौरलोकैर्विस्फूर्जत्कनकरजःपिशं गदीप्तिः प्रत्यग्रयज्ञमणिमयूखजालशोभामाधत्तेदिशिदिशिदिविकौकुमःपरागः ६ तदिदंप्रवर्तमानंपुरपरिष्कारंप्रभवेनिवेदयामीतिनिष्क्रांतः ततः त्रयोविंशतिविवाहस्थान मधिवसद्भिसवान् २ पूर्वनारदसूचनेनमहतांचंद्रार्धचूडामणिर्जामातेत्यभवत्मनस्तदनुतत्संप्राप्तिराकांक्षिता लब्धोसौतपसामयादिनमिदंतस्याश्चैववाहिकंजातं विघ्नगुणान्तीत्यकृतिनामग्रहमर्यसरः ६ शिलाधरउपसृत्य जयतुस्वामी हिमवान् शिलाधरकिंपुरपरिष्कारः प्रवर्तितोभवता शि० स्वामिन्नस्मदीयोयमु त्सवइतित्रयंकपौराणामभिमानः तत्कथंपरिहीयतेपुरपरिष्कारः सर्वद्विगुणमाचरितंपौरैः हि० शिलाधरकिंसर्वेपार्वतीपरिग्रहमंगलंद्रष्टुमागताः शि०

स्वामिन्नवधार्यतां भूपंकरुद्धकर्णिकाखिततनुर्मेरुः करांणांत्रियोवक्त्रीभूतभुजंगराजकपणस्निग्धापलोमंदरः विंध्योव्योमनिभानुसालिपदवीजंघालशृंगावलिः सा
कंसंघ्रतिगंधमादनमुखैस्त्वांद्रष्टुमभ्यागताः ७ हि० अर्घंकालसः किंकरोति शि० स्वामिन्स्खलुजामातृपक्षस्तेनवसार्धमागमिष्यति हि० युज्यते अथविश्वाव
सुप्रभृतय आगतागंधर्वाः शि० अतार्घ्यपाद्यः सर्वेगंधर्वाः ससुहृद्गणाः उपवर्णयितुंचात्मानमन्यंतस्तद्वात्सवं ८ हि० आगताः किमप्सरस्समाधर्मसरः विद्युद्दंड
वितानव्यतिकरसुमाव्योम्निविस्तारयंत्यः कांत्यानीलोत्पलानांश्रियमिवनयनैर्दिङ्मुखेदर्शयंत्यः ज्योत्स्नालक्ष्मीदिवापिस्मितरुचिविसरैर्विश्वमुत्पादयंत्यः सर्वाः
सर्वैरार्याषाः समस्तसरगणैरागताः प्रीतयेनः ९ हि० शिलाधरयायंवमंतः पुरंगत्वापवान्कुलवृद्धांकौशिकीं पुरस्कृत्यसमागतांगिरिसरोभिरप्सरोभिर्वत्सापार्वतीसख्यगल
क्रियतांइतिअभिधत्तां अलंक्रियाप्रकारंचकौशिकीसमागत्यगुरुमाचष्ट किंच आगतानांवंधनांगिरीणांचसत्कृतयंतत्रभवतासंविधातव्यः सकललोकवस्तु
संभारः शि० यथादिष्टंस्वामिनात्थासर्वंसंपादयिष्यामीतिनिष्क्रांतः प्रविश्यनारदः २ आड्ढ्योयदुपक्रांतंकार्यंगुरोर्दिवोकसां अंतरायमतिक्रान्यतद्विसिध्य
तिसाध्रतं १० इतिपरिक्रम्यावलोक्यच अयमध्यास्तेविवाहमंडपंहिमवान्तंदेनमुपसर्पामि हि० विलोक्य अयेनारदः अंजलिंबध्नाति ना० हिमवन्नाम्नु
दयः खलुतत्रभवतः हि० भवदुपक्षिप्तस्यफलमिदंबीजस्यइत्यासनमुपनयति ना० उपविशति कौशिकीपार्वत्याः परिकर्मप्रकारंनिर्दिशति कौशिकीउपविश
ति हि० कमलंकृतावत्सा कौ० भगवन्कथयामिसर्वंश्रूयतां हि० अवहितोस्मि कौ० असमग्रभूषणायास्तनुतरकौशेयवासोधारिण्याः आलिप्तमंगेसखिले
तैलेनसुरभिनातस्याः ११ हि० ततः२ कौ० मणिपीठवर्तिनींतांमंगलशब्दपुंभत्रघोषेषु अभ्यर्णमिरमरनद्याः सखीजनोविहितमज्जनेव्यतीनात् १२
हि० ततः२ कौ० मंगलमज्जनविशदाकपूरक्षोदपांडुरंक्षौमं साधत्रजलवधौतद्यौरिवशरदिंदुचंद्रिकोड्डीनं १३ हि० ततः२ कौ० चरणकमलंतदी
यंलाक्षाबालातपेनसंवलितं अध्यास्तपृंगमालावलिभिर्मणिरचितनपुरव्याजात् १४ हि० ततः२ कौ० वधूमणिमयकांचीतस्याः परि
णाहशालिनिनितंबे पंक्तिरिवसारसानांसरससारितःपुलिनमंडलाभोगे १५ हि० ततः२ कौ० करतालापरिणद्धाकुचकलशेकुंकुमारुणतस्याः
सिंदूरितकरिपतेःकुंभनक्षत्रमालेव १६ हि० ततः२ कौ० कमनीयतानिवासःकर्णस्याविचित्रमणिभूषः विविधवस्तुतरत्नशंखनिधिंदूरमकरोत् १७ हि० ततः२
कौ० मुक्ताताटंकयुगंचतिमत्कर्णपाशयोस्तस्याः मुखममलमिवनिषेवितुमागतमप्तांशुबिंबयुगं १८ हि० ततः२ कौ० आयामिनोस्तदक्ष्णोरंजनलेखाविधिं
वितन्वत्याः पाटीप्रसाधिकायाःप्रपदपांगंचिरेणविश्राम्य १९ हि० ततः२ कौ० तरुचालललाटसीम्निचंदनपंकेनमनयालिखितं आसीदातपत्रंतिलकमनंगस्य
दर्शितच्छायं २० हि० ततः२ कौ० आगुल्फलंबमस्याः कुंतलसंततिर्निगूढमंदारं संयम्यचतुरबंधंसखीजनस्तस्मितनेत्रमास्तांचिरं २१ हि० ततः२ कौ० अंगेभू
षणनिकरोभूषयतीत्येषलौकिकोवादः अंगानिभूषणानांकामपिसुषमामजीजनन्तस्याः २२ हि० यद्येवंसम्यगलंकृतावत्सातद्भवत्याः सन्निधिविशेषेण नेपथ्य

ग्रामन्मंदरकंदाराहृतिचलत्क्षीरोदपूरोदरस्फूर्जद्वीचिपरंपराकलकलघ्वानंध्रुवंतंडिकः निर्घोषःकुलशैलगह्वरगृहारंधाणिवाचालयन्दिव्यः कश्चनदुंदुभिःप
रतरःसाटोपमाहन्यते २३ सर्वेससंभ्रममाकर्णयंति पुनर्नेपथ्ये जंभारिप्रभवपार्श्वतःपरिसरणायाहिलक्ष्मीपतेवधूःस्वस्त्ययनान्यधीष्टमुनयः ब्रह्मतरोद्रीमुचं चंद्रा
र्कावपिचामरेविधुनतांछत्रीभवाहीश्वरपृष्ठरुद्रगणाःप्रयातपवनस्पंदस्खमंदोदयः २४ हि० नारदकार्यंदेवानामिवकोलाहलः श्रूयते ना० सकलजगदुत्पत्तिस्थितिप्रलयै
रुह्यमाणमहिमाचराचरजगद्गुरुस्तेजामाताचंद्रलेखाविवाहदर्षभारस्तोयसहृदेवगणैरितएवाभिवर्तते अयंकलकलस्तत्सुरःसरदेवानांप्रत्यारणाय तद्भवानर्घ्यपाणिः
प्रत्युद्यातुभगवंतमिंदुशेखरं ततःप्रविशतिगृहीतविवाहोचितवेषः शंकरोदेवलश्च शंकरः शार्ङ्गिणंप्रति अमरावतीमतिक्रम्यशीघ्रतेपुरमिदमोषधिप्रस्थं शार्ङ्गिः
किंपरिहीयतेयमहीसहेंद्रान्महेंद्रः हिमवानर्घ्यपाणिरुपसर्पति शंकरःअवलोक्य अभ्युद्गच्छतिमामचलाधिराजः तद्गाढनादवरुह्यायास्यामः तथाकरोति हि०
अर्चणानामपिदूरमक्ष्णांमकर्तृकाणांवचसामभूमिं जामातरंलब्धुमिमंगिरीशंकियंतिपुण्यानिमयाकृतानि २५ इत्यवपसर्पति शं० विलोक्य अतिगुरुचर
णक्रांतिर्वितन्वन्नवनमितोन्नमितस्खलामिवार्वां विनयमुपदिशन्निवात्मभाजामयमुपसर्पतिमामगाधिराजः २६ इत्यभिमुखमुपसर्पति हि० अर्घ्यमुपहरति
शं० सघ्रणामंप्रतिगृह्णाति हि० सलज्जमुखमवनमति जामातरंपुरस्कृत्यहरिविधिमुखाःपरिक्रामंति ब्रह्मा भगवन्कुत्रवैवाहिकोविधिः हि० इतइतोभगवंतः
सर्वेनुपसर्पंति बृह० हिमवन्ह्यासन्नोमुहूर्तस्तदाहूयतोदुहिता हि० नेपथ्याभिमुखंपरिक्रम्य दत्तेइतइतः ततःप्रविशतिजयाविजयाप्रत्यासहपार्वती २ अय
खलुममनोरथकल्पद्रुमःफलंदर्शयति जया सख्मिंतं छा० हलापार्वतिइयत्रवप्रियसख्यावाबीजाते पा० सासूयं छा० हलाविजयेकिमघाभणति विजया
छा० हलापार्वतिएषासरसालापकुशलंवंदशयति इत्यपसर्पति बृ० शार्ङ्गिणंप्रति भगवन्सर्वदेवाभूतगणैःसहयथास्थानमुपविशंतु सर्वतथाकुर्वति हि०
अस्मत्पक्षाःकैलासेनसमंवामपार्श्वमुपविशंतु कुलपर्वतास्तथाकुर्वंति शं० पार्वतींविलोक्य आत्मगतं एषाविशेषरम्यविवाहवेषणमोहनेनदृशा प्रीतिभाति
मानसेसमदनसहस्राणिकल्पयंतीव २७ बृ० शंकरबंधासहास्यांविवाहवेदिकायांप्राङ्मुखोवर्तेथाः शं० पार्वत्यासहोपविशति आत्मगतं नंदितनयनचको
रानवनलावण्यैकामृतविसरा उकलयतेमनोमेसंषाजलधिंकलेवचंद्रमसी २८ बृ० अग्निमुपसमाधाय शंकरवदीयेनपाणिनापार्वत्याःपाणिमवलंबस्व
शं० तथाकरोति पार्वतीपुलकांकुंदमभिनयति शं० आत्मगतं आभातिबालिकेयंपाणिस्पर्शेनपुलकितावयवा अभिनववसंतसंगादाविमुकुलेववालचूतल
ता २९ ब्रह्मा० वधूवरोपावर्कंप्रणामीकुरुतां उभौतथाकुरुतः पार्वतीशंकरमवलोकयति शं० प्रत्यवलोकयति पा० दृष्टिंपरावर्तयति शं० आत्मगतं अवलो
कनायलोलादृष्टिरियंमृगदृशोनिवृत्तमती गच्छतिप्रवाहंराजतिशफरीनिवर्तमानेव ३० बृ० पार्वत्याः पाणिनालाजांजलिंकारयति पा० धूमाकर्षणेनवक्त्र
व्यंनिरूपयति शं० आत्म० प्रस्विन्नगंडफलकायतपत्रलेखंधूमाभिघंगगलितांजनपाटलाक्षं म्लायद्वतंसकुसुमंमुखमायताक्ष्याश्चित्रंनमार्यतिकाम

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

चिरागमुद्रां ३१ ब्र० शंकरंप्रति पार्वत्याः पादकमलंपाणिभ्यामभ्यानमारोपयतुभवान् शं० स्मयमानमुखस्तूष्णींतिष्ठति कुलपर्वताःससंरंभं भगवन्प्रणमभूतेनपुरोधसायदुच्यतेतदनुष्ठीयतां भूतगणाःससंरंभं कुलपर्वताःकथमिदंनियम्यतेत्रिभुवननियंतानीललोहितः ब्र० सस्मितमुभयान्निवार्य सकलजननियामकास्वतःप्रमाणभूताश्रुतिरेवसम्यगित्थमभिदधाति यथोक्तमनुष्ठीयतां शं० कुंचिताभ्यांपाणिभ्यांपार्वत्याःपादकमलमभ्यानमारोपयति ब्र० कर्मशेषंसमापयति शंकरःपार्वतीचब्रह्माणंपरिणमतः ब्रह्मा हस्तमुद्यम्य सकलजगतांसवित्रोरनन्यसामान्यमस्कृवोःप्रेम भुवनभयभंगदक्षोभवदुकुमारो पितारकध्वंसी ३२ इत्याशिषंप्रत्यक्षे प्रविश्यवृद्धपुरंध्रः छा० अन्योन्यसमशरीरयोरन्योन्यप्रगूढगाढप्रेम्णाः ज्योत्स्नानिशाकरयोरिवयुवयुवयोर्भ वदुकोप्यनुरागः ३३ इत्याद्वीक्षतारोपणमाचरंति नारदः उत्थायसांजलिबंधं भगवन्कार्यहेतोः कृतापराधंकंदर्पपुनर्ग्रहीतवपुषंपादसेविनंचभवाननगृ ह्णातां शं० यथारोचतेतथाभवतु ततः प्रविशतिरतिरतिवसंताभ्यांसहपूर्वाकाराधिकविग्रहःकामः माधुर्यसौरभतरंगितचापबाणारव्यासदादरपरिष्कृतवा मभागः सख्युःकरंसमवलंब्यशनैरनंगआगत्यशंकरपदेप्रणनामसहर्षं ३४ सर्वविस्मयंरूपयंति हि० सहर्षं पुण्यैरवपुरातनेभगवतादेवनविश्वात्म नापुत्रीभूरिगुणावदातचरितापाणेर्गृहीताममदेवानांचमनोरथःपरिणतःप्राप्यानवद्यंवपुर्लोकानंदकरःस्मरोपिनयनातिथ्यंविधत्तेपुनः ३५ समाधिग तसकलमनोरथानांकिमतःपरंप्रार्थनीयं तथापीदमस्तूक्षरतवाक्यं पर्जन्योवृष्टिमिष्टांप्रदिशतुजगतांभद्रसंपादयित्रींशश्वत्सस्येःप्रसूतैर्भवतुपुलकि तासर्वतोभूतधात्री वर्धतांवीतविद्याःस्फुरदुपकृतयःसंपदःसज्जनानांनित्यानंदोमहेशोनिरतिशयसुखंप्राप्नुयेकल्पतांवः ३६ इतिनिष्क्रांताःसर्वे

इतिपंचमांकः ५ इतिश्रीबाणकविविरचितंपार्वतीपरिणयनामनाटकंसमाप्तिमगमत्॥ श्रीगुरुः॥श्रीः॥ ॥ ७॥ ॥

श्रीमतांरावजीमहाराजानांमूलप्रेनर्ल्लिपीकृतोयंग्रंथः॥शके १८० क्रोधननामसंवत्सरेभाद्रपदशुक्लैकादश्यामत्रमुंबा यांप्रविष्टश्च॥

डाक्टर भाऊदाजी ओरिएन्टल इन्स्टीट्यूट MEMORIAL